# आत्मा-न्यायशास्त्रे वेदान्तशास्त्रे च ।

Dr. Ajimon C.S.
Asst. Professor, Govt. Sanskrit College, Tripunithura

Submitted on: 05/10/2019 Revised on: 27/10/2019 Accepted on: 29/10/2019

दार्शनिकाः सर्वे अपि बन्धमोक्षादिव्यवहारं जीवात्मन एव प्रतिपादयन्ति। अत्र जिज्ञासा वर्तते को अयं जीवात्मा नाम, तस्य स्वरूपं किम्, अस्य उत्पत्तिः कथं इति। दार्शनिकानां मध्ये आत्मस्वरूपविषये ऐकमत्यं न दृश्यते। केचन दार्शनिकाः आत्मनः अनेकत्वं अन्ये केचन एकत्वं च वदन्ति। आत्मस्वरूपे, तस्य कर्तृत्वे च दार्शनिकानां विभिन्नाभिप्रायत्वं दृश्यते। नैय्यायिकाः ज्ञानाधिकरणं आत्मेति वदन्ति, वेदान्तिनः नित्यविज्ञानमेवात्मेति वदन्ति, सांख्याःपुरुषः पुष्करपलाशवत् निर्लेपः इति वदन्ति, बौद्धाः क्षणिकविज्ञानमेव आत्मेति वदन्ति। एवं विभिन्नाः सिद्दान्ताः आत्मानं अधिकृत्य वर्तन्ते। प्रबन्धे अस्मिन् आत्मविषये नैय्यायिकानां वेदान्तिनां च मतभेदं प्रदर्श्य वेदान्तमतखण्डनं क्रियते।

**नैय्यायिकमते आत्मा**

नैय्यायिकाः षोडशपदार्थान् अङ्गीकुर्वन्ति। तदुक्तं न्यायसूत्रकारेण- प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानाद् निःश्रेयसाधिगमः इति[1]।प्रमाणादि निग्रहस्थानपर्यन्तानां षोडशपदार्थानां तत्वज्ञानात्- यथार्थज्ञानात् निःश्रेयसाधिगमः- मोक्षप्राप्तिर्भवतीति सूत्रार्थः। अनेन सूत्रेण न्यायशास्त्रस्य आत्यन्तिकलक्ष्यं मोक्षप्राप्तिरेवेति प्रदर्श्यते सूत्रकारेण। हेयं, हेयसाधनं, हानं, हानसाधनं चैतानि सम्यक् ज्ञात्वा मोक्षपदं प्राप्नोति इति न्यायभाष्यकारः[2]। न्यायसूत्रकारः गौतममहर्षिः द्वादशविधप्रमेयेषु अन्यतमत्वेन आत्मानं प्रतिपादयति- आत्मशरीरेन्द्रियार्थबुद्धिमनप्रवृत्तिदोषप् रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् [3] इति। षोडशपदार्थेषु द्वितीयः पदार्थः भवति प्रमेयम्। प्रमायाः विषयः प्रमेयं इति व्युत्पत्तिमधिकृत्य सर्वे अपि ज्ञानविषयाः प्रमेये अन्तर्भवन्ति। तथापि येषां विपरीतज्ञानात् जीवात्मनः संसारबन्धः, येषां तु तत्वज्ञानात् जीवात्मनः संसारनिवृत्तिः च संभवति तान्येव अत्र प्रमेयपदेन प्रतिपाद्यते। न्यायभाष्यकारः वात्स्यायनः वदति – ":अस्य तत्वज्ञानात् अपवर्गो मिथ्याज्ञानात् संसार इत्यतः तदुपदिष्टं विशेषेणेति" [4]। अतः एतेषां तत्वज्ञानं मोक्षप्राप्त्युपकारकं भवति नैय्यायिकमते। अतः मोक्षप्राप्तौ प्रमेयान्तर्भूतानां द्वादशविषयाणां तत्वज्ञानस्य प्राधान्यमस्ति।

**आत्मनः शरीरातिरिक्तत्वम्।**

न्यायसूत्रकारः "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति"[5]सूत्रेण आत्मानुमाने लिङ्गानि प्रदर्शयति। इच्छादयः आत्मानुमाने लिङ्गानि भवन्ति इति सूत्रस्याशयः। यादृशविषयस्य अनुभवात् आत्मा सुखं प्राप्तवान् तादृशविषयं पुनः पश्यन् तं ग्रहीतुं इच्छति। अयं उपादानेच्छा अनेकार्थदर्शिनः –पूर्वापरपदार्थदर्शिनः एकस्य तत्पदार्थानुभवजन्यसुखस्मरणात् एव संभवति इति इच्छा आत्मानुमाने लिङ्गं भवति। एवं द्वेषादिना अपि आत्मानुमातुं शक्यते। इच्छादीनां आश्रयत्वं शरीरस्य न संभवति। इच्छादयः यदि शरीरस्य चेत् मृतशरीरेपि ते स्युः, किन्तु तथा न दृश्यते इत्यतः शरीराद्यतिरिक्तः कश्चन पदार्थः तेषामाश्रयत्वेन अवश्यं स्वीकार्यः। स एवात्मा इति न्यायमतं।

चार्वाकाः शरीरमेवात्मेति वदन्ति। शरीरातिरिक्तः आत्मा नास्तीति तेषां मतं। किन्तु तन्न नैय्यायिकाः अङ्गीकुर्वन्ति। शरीरस्य आत्मत्वे तस्य उपचयापयसंभवात् उत्पादविनाशशालित्वात्, बाल्ये विलोकितस्य स्थविरे स्मृतिर्न भवेत्, तदानीं बाल्यकालशरीराभावात्। यः अनुभवति स एव स्मरति, न अन्यदृष्टमन्येन स्मर्यते इत्यादि अनुभवबलात् अनुभवस्मरणयोः सामानाधिकरण्यं स्पष्टमेव। अतः शरीरस्य आत्मत्वं वक्तुं न शक्यते। "शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः" इति मुक्तावलीकारः शरीरस्य आत्मत्वं निराकरोति[6]।

शरीरातिरिक्तस्य आत्मनः अस्वीकार्ये जातमात्रस्य बालकस्य स्तन्यपानप्रवृत्तिं उपपादयितुं न शक्यते। प्रवृतत्तिं प्रति इष्टसाधनताज्ञानस्य हेतुत्वं अस्ति। जातमात्रस्य बालकस्य स्तन्यपानप्रवृत्तिजनकं इष्टसाधनताज्ञानं अस्मिन् जन्मनि वक्तुं न शक्यते। शरीरातिरिक्तस्य आत्मनः स्वीकारे जन्मान्तरानुभूतेष्टसाधनत्वस्य स्मरणादेव बालकस्य स्तन्यपानप्रवृत्तिरिति वक्तुं शक्यते। अतः जन्मान्तरीयकं इष्टसाधनताज्ञानमेव तादृशबालकस्य स्तन्यपानप्रवृत्तौ हेतुरिति स्वीकार्यः। जन्मान्तरीयकं इष्टसाधनताज्ञानस्वीकारे पूर्वजन्मनि अस्मिन् जन्मनि च एकैव आत्मेति सिद्ध्यति इति आत्मनः नित्यत्वं अपि स्पष्टमेव।

**आत्मनः इन्द्रियातिरिक्तत्वम्।**

इन्द्रियाणामपि आत्मत्वं न संभवति । तदुच्यते मुक्तावल्यां- "तथात्वं चेत् इन्द्रियाणमुपघाते कथं स्मृतिः" इति[7]। तथात्वं नाम चैतन्यं। चक्षुरादि इन्द्रियाणामेव चैतन्यं अथवा आत्मत्वं चेत् चक्षुरादीनां उपघाते –नाशे सति कथं स्मृतिः भविष्यति। यतः चक्षुषा अनुभूतस्य विषयस्य स्मरणं चक्षुरभावे कथं स्याद्, अनुभवितुः चक्षुरिन्द्रियस्य अभावात्। अन्यानुभूतस्य अन्येन स्मर्तुं न शक्यते, सामानाधिकरण्येन अनुभवस्मरणयोः कार्यकारणभावात्। यथा चैत्रेण अनुभूतस्य मैत्रेण स्मर्तुं न शक्यते तथा। अतः इन्द्रियाणामुपघातेपि तैरनुभूतविषयाणां स्मृतिः संभवतीत्यतः तेषामात्मत्वं नैव संभवति। तद्वत् यो अहं घटमद्राक्षं सो अहमिदानीं स्पृशामीति अनुसन्धानं इन्द्रियाणामात्मत्वे न संभवति। यतः अन्येन चक्षुरिन्द्रियेण अनुभूतस्य अर्थस्य अनुसन्धानं अन्येन त्वगिन्द्रियेण असंभवात्। सूत्रकारः दर्शनस्पर्शनाभ्यां एकार्थग्रहणात् इति सूत्रेण अयमेवाशयः प्रदर्शितवान्। मनसः अपि आत्मत्वं न संभवति। उच्यते मुक्तावलीकारेण "मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्" 8 इति। न तथा- न आत्मा इत्यर्थः। यदि नित्यः मनः भवति आत्मा इतिस्वीकारे पूर्वोक्त उपघाताद्यभावात्

अनुसन्धानस्य वा स्मरणस्य वा अनुपपत्तिः न स्यादिति चेत् न, मनसः आत्मत्वे तन्निष्ठज्ञानादीनां प्रत्यक्षं न स्यात्। तत्र कारणं मनसः अणुत्वमेव। प्रत्यक्षे महत्परिमाणस्य हेतुत्वं अस्ति मनसि तु तन्नास्त्येव। अतः मनसः आत्मत्वे तत्र वर्तमानान् ज्ञानसुखादीन् प्रत्यक्षीकर्तुं न शक्यते इति नैय्यायिकाः। तेन मनोपि नात्मा।

**न्यायमते आत्मलक्षणम्।**

ज्ञानाधिकरणमात्मा इति लक्षणमुच्यते अन्नंभट्टेन[9]। अधिकरणपदं समवायेन ज्ञानाश्रयत्वं बोधयति। समवायसंबन्धेन ज्ञानाधिकरणमात्मा इति लक्षणस्याशयः। ज्ञानं तु सर्वव्यवहारहेतुर्गुणः भवति। बुद्धिरुपलब्धिर्ज्ञानं इत्यादयः पर्यायशब्दाः भवन्ति न्यायमते। ज्ञानस्य अधिकरणं ज्ञानाधिकरणम्। अत्र षष्ठीविभक्तेः निरूपितत्वमर्थः। अधिकरणत्वं तु आश्रयत्वं। एवं ज्ञाननिरूपिताश्रयत्वं आत्मनो लक्षणं इति वक्तुं शक्यते। आत्मा द्विविधः जीवात्मा परमात्मा चेति। तत्र ईश्वरः सर्वज्ञः एक एव। नित्यज्ञानाधिकरणत्वमीश्वरत्वं इति परमात्मनः लक्षणम् [10]। जीवात्मानं अपेक्ष्य परमात्मनः वैशिष्ट्यं नित्यज्ञानत्वमेव। परमात्मा सर्वज्ञः च भवति। परमात्मा इत्यत्र परमत्वं उत्कृष्टत्वं तत्तु सृष्टिप्रलयकर्तृत्वं [11]। ईश्वरे नित्यज्ञानं कथमिति चेत्- सर्गाद्यवसरे परमाणुना द्व्यणुकं करिष्यामीति ज्ञानस्यावश्यकत्वेन तदुत्पादकशरीरादिकारणकलापस्य तदानीं व्यतिरेकेण तस्य नित्यत्वमुरीकुर्मः [12] इत्युच्यते सिद्धान्तचन्द्रोदये। जीवात्मा तु अनेकः, अल्पज्ञः, नित्यज्ञानरहितः च भवति। आत्मा इन्द्रायाद्यधिष्ठाता करणं हि सकर्तृकम् इति कारिकावल्ल्यां [13] आत्मानं निरूपयति। अधिष्ठाता इत्यस्य शरीरस्य आत्मनः च परंपरया चैतन्यसंपादकः इत्यर्थः। यथा वात्स्यादि छिदा करणानि कर्तृसहायं विना न फलं जनयन्ति तथा चक्षुरादि ज्ञानकरणानि अपि कर्तुः आत्मनः सहायं विना ज्ञानरूपं फलं जनयन्ति इति प्रतिपादयितुं न शक्यते। अतः चक्षुरादीन्द्रियातिरिक्तः कर्ता कल्प्यते। अयमेव कर्ता धर्माधर्माश्रयः। शरीरादिषु धर्माद्यश्रयत्वं न वक्तुं शक्यते भोगे नियतत्वानुपपत्तेः। ज्ञानसुखादि योग्यविशेषगुणसंबन्धेन आत्मनः प्रत्यक्षं संभवति, यथा अहं जानामि, अहं करोमि इत्यादि रूपेण।

तत्र जीवः बन्धमोक्षयोग्यः जन्यज्ञानाधिकरणं च भवति। सुखदुःखादीनां विलक्षणात् जीवात्मा प्रतिशरीरं भिन्नो भवति। जीवात्मनः विभुत्वं नैय्यायिकाः अङ्गीकुर्वन्ति। आत्मनः अणुत्वे सर्वरीरव्यापि सुखादीनां उपलब्धिः न स्याद्। तस्य मध्यम परिमाणत्वे अनित्यत्वापत्तिरिति कृतहानाकृताभ्यागमः च स्याद्। अतः जीवात्मनः विभुपरिमाणत्वमेव युक्तम्।

**आत्मनः अस्तित्वे अनुमानप्रमाणम्।**

अहं सुखी अहं दुःखी इत्यादि अनुभवात् आत्मनः सत्वे मानसप्रत्यक्षं प्रमाणमस्ति। तथापि आत्मा नास्ति इति वदतां नास्तिकानां मतं निराकर्तुं अनुमानस्य आत्मसत्वसाधने प्रमाणत्वेन स्वीकरोति। तथा हि बुद्ध्यादयः *पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः* पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात् इति अनुमानस्वरूपम्। यः गुणः यद्रव्यानाश्रितः भवति स गुणः तद्द्रव्यातिरिक्त द्रव्याश्रितः भवति। यथा पृथिव्याद्यनाश्रितः शब्दः आकाशाश्रितः भवति। बुद्ध्यादयः गुणाः भवन्ति, अनित्यत्वे सति

एकेन्द्रियमात्रग्राह्यत्वात् रूपवत्। गुणाः द्रव्याश्रिताः भवन्ति। बुद्ध्यादयो न पृथिव्यादि भूतानां गुणाः मानसप्रत्यक्षविषयत्वात्। रूपादि भूतगुणाः मनसा न गृह्यन्ते। दिक्कालमनसां गुणो न, विशेषगुणत्वात्। संख्यादि दिक्कालगुणाः सामान्यगुणाः भवन्ति,न तु विशेषगुणाः। एकेन्द्रियग्राह्यत्वात् बुद्ध्यादयः रूपादिवद् विशेषगुणा एव। एवं पृथिव्यादिषु तेषामाश्रयत्वाभावात् बुद्ध्यादीनां आश्रयत्वेन पृथिव्याद्यतिरिक्तद्रव्यत्वेन आत्मा सिद्ध्यति।परशरीरे आत्मा प्रवृत्त्यादिना अनुमेयो भवति। यथा अचेतनस्य रथस्य गमनेन तन्निष्ठसारथिं अनुमीयते तथा अचेतनस्य शरीरस्य प्रवृत्त्यादिना तादृश प्रवृत्त्याश्रयः आत्मा अनुमातुं शक्यते। तदुच्यते - प्रवृत्त्याद्यनुमेयो अयं रथगत्येव सारथिः [14] इति। अत्र प्रवृत्ति शब्देन चेष्टा एव उद्दिश्यते। चेष्टा तु हिताहितप्राप्तिपरिहारानुकूला क्रिया। आत्मनिष्ठा भवति सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनान्यतमसमवायिकारणता । तादृशकारणतावच्छेदकतया आत्मत्वजातिः सिद्यति। ईश्वरे अपि आत्मत्वजातिरस्ति किन्तु अदृष्टादीनामभावात् सुखादयः ईश्वरे नास्ति।

**आत्मविषये वेदान्तमतनिराकरणम्।**

आचार्य विश्वनाथः न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे आत्मनिरूपणावसरे वेदान्तादिषु इतरशास्त्रेषु कथं आत्मानं निरूपयतीति विचारः करोति। वेदान्तशास्त्रमनुसृत्य नित्यविज्ञानमेवात्मा। तत्र नित्यं विज्ञानमानन्दं ब्रह्मेत्यादि श्रुतयः प्रमाणत्वेन प्रदर्शयन्ति। अविनाशी वा अरे अयमात्मा, सत्यं ज्ञानमनन्तं ब्रह्म इत्यादि श्रुतयः अपि आत्मस्वरूपमेव प्रतिपादयन्तीति वेदान्तमतम्। वेदान्तविचारे प्रस्तूयमानः आत्मा नाशाप्रतियोगी, त्रिकालाबाधितः भवति। अत्र ब्रह्म अथवा आत्मा लक्ष्यम्। सत्यत्वादिकं तु तल्लक्षणम्। सत्यं नाम त्रिकालाबाध्यत्वं, ज्ञानं तु चित्स्वभावः, अनन्तं इत्यस्य व्यापकं –देशकालवस्त्वपरिच्छिन्नम् इत्यर्थः। एवं वेदान्तशास्त्रमनुसृत्य अनृतभिन्नं जडभिन्नं अपरिच्छिन्नं च भवति आत्मा। वेदान्तिनः जीवब्रह्मणोः अभेदत्वं स्वीकुर्वन्ति। अत्र एक एव आत्मा, न तु अनेकम्। शरीराद्यवच्छेदेनैव तस्य भेदो वक्तुं शक्यते। ब्रह्म उपाधिवशादेव जीवभावं प्राप्नोति। उपाधीनां अनेकत्वात् जीवानामपि अनेकत्वं। माया अविद्या चेति उपाधिः द्विविधः। मायोपाध्यवच्छिन्नं ब्रह्म ईश्वरः, अविद्योपाधिविशिष्टः ब्रह्म जीवः। अस्य संसारस्य कारणमपि अविद्यैव। अविद्यानाशे जीवः स्वस्य ब्रह्माभिन्नत्वं प्रत्यभिजानाति। तदेव अहं ब्रह्मास्मि इत्यादि श्रुतौ प्रतिपादितं इति वेदान्तिनां मतम्।

नैय्यायिकाः वेदान्तिनां मतं नाङ्गीकुर्वन्ति। विज्ञानस्य आत्मत्वं न संभवति। विज्ञानमेव आत्मा चेत् तस्य सविषयकत्वं वाच्यं विज्ञानस्य सविषयकत्वात्। सविषयक विज्ञानस्य आत्मत्वे तस्य जगद्विषयकत्वं वा यत्किञ्चित् विषयकत्वं वा इति वाच्यम्। विज्ञानस्वरूपस्य आत्मनः जगद्विषयकत्वं न संभवति यतः तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तेः। लोके जीवात्मनां तु सर्वज्ञत्वं न दृश्यते। यत्किञ्चित् विषयकत्वमपि न संभवति विनिगमनाविरहात्। घटविषयकज्ञानमेवात्मा न तु पटविषयकज्ञानमेवात्मा इति विनिगमनाविरहात्। अतः सविषयकज्ञानस्य आत्मत्वं न संभवति। सविषयकज्ञानमेवात्मेति स्वीकारे सुषुप्तौ अपि विषयावभासः स्याद्।

किन्तु सुषुप्तौ कस्यापि विषयस्य ज्ञानं न भासते। अतः सविषयकज्ञानं न आत्मा। ननु निर्विषयकं विज्ञानं आत्मा इति चेत् न निर्विषयकस्य ज्ञानत्वे मानाभावात्। ज्ञानेच्छादयः सर्वदा सविषयकाः भवन्ति इति नैय्यायिकाः। अत्र सत्यं ज्ञानमनन्तं इत्यादि श्रुतयः ब्रह्मबोधकं भवति न तु जीवात्मबोधकम् इति न्यायमतम्। सर्वेषां जीवात्मनां सर्वदा सुखमेव, सर्वेषु ज्ञानं अस्ति, सर्वेषु सत्यं अस्ति इत्यनुभवो लोके नास्ति। किन्तु केषाञ्चित् सुखं, केषाञ्चित् दुःखं च वर्तते। अतः जीवात्मनां परस्परं भेदः अस्ति। तथा सति कथं जीवब्रह्मणोः अभेदः स्यात् इति नैय्यायिकाः। उच्यते मुक्तावलीकारेण –सत्यं ज्ञानमिति तु ब्रह्मपरं जीवे तु नोपयुज्यते। ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः इति[15]। यद्यत्र जीवब्रह्मणोः ऐक्यं वर्तते तर्हि बन्धमोक्षव्यवस्था एव न स्याद्। यतः तत्र बद्धमुक्तात्मनोः जीवात्मपरमात्मनोः ऐक्यात्।

ननु अत्र तत्तदन्तकरणावच्छिन्नचैतन्यस्य एकत्वेपि अन्तःकरणनाशे तदन्तकरणावच्छिन्नस्य चैतन्यस्य मोक्षः संभवति। यदन्तकरणस्य नाशो न अभवत् तस्य बद्धत्वव्यवहारः शक्यतेति चेन्न तथा सति मोक्षप्राप्त्यर्थं क्रियमाणस्य कर्मणःनिष्फलत्वापत्तिः स्यात्। तत्र कारणं तु आत्मनः एकान्तकरणनाशे अपि अन्तकरणान्तरावच्छिन्ने स्वात्मनि दुखोत्पत्तिः अवश्यं भवेत् इत्येतदेव। अतः मोक्षप्राप्त्यर्थं कृतेन प्रयत्नेन दुखाभावः प्राप्तुमशक्यत्वात्। ननु सुखादयः अन्तकरणस्यैव न तु आत्मनः इति चेत् मोक्षार्थं प्रयासः व्यर्थः एव, आत्मनः नित्यमुक्तत्वात्। यद्यत्र भ्रमनिवृत्यर्थमेव प्रयत्नः इति चेत् तदापि अन्तकरणान्तरावच्छिन्ने स्वस्मिन्नेव भ्रान्तेरावश्यकत्वेन प्रयत्नस्य निष्फलत्वापत्तेः। अतः जीवब्रह्मणोः अभेदत्वं न संभवति इति नैय्यायिकाः।

जीवब्रह्मणोः भेदस्वीकारे तत्वमसि इत्यादि श्रुतिविरोधः स्यादिति चेन्न, तत्वमसीत्यादौ ईश्वराभेदेन तत्स्वरूपं प्रतिपादयन् स्तौति। अभेदभावनया मोक्षार्थं यत्नः कार्यः इति अत्र तात्पर्यं। तत्र प्रमाणत्वेन मुक्तावलीकारः सर्वे एवात्मनि समर्पिताः इति श्रुतिं प्रदर्शयति। अतः जीवब्रह्मणोः अभेदत्वे उपास्योपासकप्रतिपादकश्रुतेः प्रामाण्यमेव न स्यात्।ननु मोक्षावस्थायां अज्ञाननिवृत्तौ जीवात्मनः ब्रह्मणा अभेदः प्राप्नोति इति चेन्न जीवब्रह्मणोः भेदो नाम अन्योन्याभावः एवेत्यतः तस्य नित्यत्वात् मोक्षावस्थायामपि नाशो न संभवति। यदि भेदनाशः संभवति तथापि जीवात्मपरमात्मात्मकव्यक्तिद्वयं स्थास्यत्वेव। ननु मोक्षावस्थायां द्वित्वमपि नश्यति, यतः ब्रह्मभिन्नानां मिथ्यात्वात् द्वित्वस्यापि मिथ्यात्वं संभवति इत्यतः।द्वित्वादिकं अपेक्षाबुद्धिजन्यत्वात् अपेक्षाबुद्धिनाशात् तज्जन्य द्वित्वमपि नश्यति। तेन विशेषणाभावे विशिष्टव्यक्तिद्वयस्थितिरपि न स्यादिति चेत् तदपि नेति नैय्यायिकाः। यथा वेदान्तमते ब्रह्मणि धर्मरहिते सत्यत्वाभावे अपि सत्यस्वरूपं उक्तमस्ति तथैव मोक्षावस्थायां द्वित्वाभावे अपि व्यक्तिद्वयात्मकं जीवब्रह्मणोः द्वित्वमस्तीति वक्तुं शक्यते।ननु ब्रह्मणि सत्यत्वं नाम मिथ्यात्वाभावः अधिकरणात्मकमिति यदि वदति तर्हि एकत्वाभावो व्यक्तिद्वयात्मकः द्वित्वमित्यपि प्रतिपादयितुं शक्यते। अतः जीवब्रह्मणोः अभेदत्वं नास्तीति नैय्यायिकाः। मोक्षकाले अभेदप्रतिपादकाः ब्रह्मविद् ब्रह्मैव भवति इत्यादि श्रुतयः निर्दुःखत्वादिना साम्यमेव प्रतिपादयन्ति न तु अभेदत्वम्। यथा अयं पुरोहितः संपदाधिक्ये राजा संवृत्त इतिवत् एव तत्र अभेदप्रतिपादनम् नैय्यायिकाः।

अत्र ब्रह्मणः अपि ज्ञानं सुखं च स्वरूपमिति वक्तुं न शक्यते, किन्तु ज्ञानसुखादीनां अधिकरणत्वमेव वक्तुं शक्यते। तदुच्यते – ईश्वरोपि न ज्ञानसुखात्मा किं तु ज्ञानाद्याश्रयः, नित्यं विज्ञानमानन्दं ब्रह्म इत्यादौ विज्ञानपदेन ज्ञानाश्रयः एवोक्तः, यः सर्वज्ञः स सर्ववित् इत्याद्यनुरोधात् इति ।6। एवमुक्त श्रुतौ आनन्दमित्यस्य आनन्दवत् इत्यर्थः। आनन्दवत् इत्यर्थाभावे आनन्दः इति पुल्लिङ्गमेव प्रयोक्तव्यः इति नैय्यायिकाः। अत्र अर्श आदिभ्यो अच् इति सूत्रेण मतुबर्थकाच्प्रत्ययनिष्पन्नमिदं नपुंसकलिङ्गमानन्दपदम्। तत्र आनन्दः अस्य अस्तीति व्युत्पत्तिः। एवं आनन्दपदं आनन्दवदित्यर्थपरम् इति नैय्यायिकाः। आनन्दपदमत्र दुःखाभावे लाक्षणिकम्। यथा भारवाहः भारापगमे सुखीसंवृत्तो अहमिति मन्यते तद्वत् अत्रापि आनन्दपदेन दुःखाभावः एव उद्दिश्यते।

यदि आनन्दपदस्य आनन्दमित्येवार्थः स्वीकरणीयः तर्हि तस्मिन् परमात्मनि आनन्दः अस्तु न तु असौ परमात्मा आनन्दः। परमात्मनि सुखप्रतिपादकं श्रुतिं प्रदर्शयति असुखं इत्यादिना मुक्तावलीकारः।असुखं इत्यत्र नञ् तत्पुरुषाश्रयेण नञ् पदं परमेश्वरसकाशात् सुखस्य भेदं बोधयति। तस्मात् सुखभिन्नत्वे सति सुखाधिकरणं एव परमात्मा इत्यर्थः असुखं इति श्रुतेः इति मुक्तावलीकारः। एवं ज्ञानाद्यधिकरणतमेव आत्मा न्यायमते न तु ज्ञानादीनां आत्मत्वं ।

**आत्मा सांख्यमते**

सांख्याः पुरुषशब्देन आत्मानं प्रतिपादयन्ति। तेषां मते पुरुषः पुष्करपलाशवद् निर्लेपः भवति। किन्तु पुरुषः चेतनः तथा नित्यः च भवति।कर्तृत्वं प्रकृतेः एव पुरुषस्य तु कर्तृत्वं नास्ति ।सांख्याः कार्यकारणयोरभेदत्वं स्वीकुर्वन्तीत्यतः पुरुषस्य कारणत्वं स्वीकर्तुं न शक्यते यतः कार्यनाशे सति कार्यरूपस्य पुरुषस्यापि नाशः स्यात्। प्रकृतेःपरिणामो भवति बुद्धिः। पुरुषस्य संसारापवर्गौ बुद्धिसत्वासत्वाभ्यां एव इति सांख्याः। किन्तु सांख्यमतं नैय्यायिकाः नाङ्गीकुर्वन्ति। तत्र कारणं तु यत्र कृत्यदृष्टभोगाः सन्ति तत्रैव चैतन्यमपि स्यात्। कृत्यदृष्टभोगचैतन्यानां समानाधिकरणवृत्तित्वं अवश्यं अङ्गीकार्यम् तेषां भिन्नाधिकरणत्वे प्रमाणं नास्ति इति नैय्यायिकाः। सांख्यमते कर्ता प्रकृतिः अचेतना एव। चेतनः पुरुषः तु अकर्ता च भवति। तत्तु न युक्तमिति नैय्यायिकाः। बौद्धोक्तं क्षणिकविज्ञानमेवात्मेति मतं अपि वेदान्तमतनिराकरणेन निरस्तं भवति।

न्यायमते आत्मा ज्ञानाधिकरणमेव न तु विज्ञानम्। ज्ञानादयः आत्मगुणाः भवन्ति। शरीरेन्द्रिभिन्नः भवति आत्मा। आत्मनः अनेकत्वं विभुत्वं नित्यत्वं च नैय्यायिकाः अङ्गीकुर्वन्ति। सुखदुःखादीनां भिन्नत्वात् प्रतिशरीरं आत्मा भिन्नो भवति। जीवात्मपरमात्मनो– ऐक्यं नैय्यायिकाः नाङ्गीकुर्वन्ति। जीवात्मा परमात्मा चेति आत्मा द्विधः न्यायमते। परमात्मा एकः सर्वज्ञः, नित्यज्ञानाधिकरणं च भवति।

## टिप्पणी

1. न्यायसूत्रे प्रथमाध्याये प्रथमाह्निके प्रथमसूत्रम्।(1.1.1)
2. हेयं तस्य निर्वर्तकं हानमात्यन्तिकं तस्योपोयोधिगन्तव्य इत्येतानि चत्वार्यर्थपदानि सम्यग् बुद्ध्वा निःश्रेयसमधिगच्छति, न्यायसूत्रभाष्ये प्रथमाध्याये प्रथमाह्निके पृ.5.
3. न्यायसूत्रं, प्रथमाध्याये प्रथमाह्निके नवमसूत्रम्।(1.1.9)
4. न्यायसूत्रभाष्यं,प्रथमाध्याये प्रथमाह्निके नवमसूत्रम्।(1.1.9)
5. न्यायसूत्रं, प्रथमाध्याये प्रथमाह्निके दशमसूत्रम्। (1.1.10)
6. न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे अष्टचत्वारिंशतमा कारिका।
7. न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे अष्टचत्वारिंशतमा कारिका।
8. न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे नवचत्वारिंशतमा कारिका।
9. तर्कसंग्रहः पृ. 55
10. तर्कसंग्रहदीपिका पृ.55
11. परमत्वं चोत्कृष्टत्वं, तच्च प्रकृते सृष्टिस्थितिप्रलयकर्तृत्वं, तर्कसंग्रहस्य व्याख्या सिद्धान्तचन्द्रोदयः- पृ.45
12. तर्कसंग्रहस्य व्याख्या सिद्धान्तचन्द्रोदयः- पृ.45
13. कारिकावली प्रत्यक्षखण्डे कारिका- 50
14. कारिकावली प्रत्यक्षखण्डे कारिका- 50
15. न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे पृ.221.
16. न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डे पृ.223.

## सहायकग्रन्थाः


1. तर्कसंग्रह, दीपिका किरणावली सहित, श्रीकृष्णवल्लभाचार्यः, व्यासप्रकाशन, मानसमन्दिर्, वाराणसी।
2. तर्कभाषा, केशवमिश्रः,चौखंबा संस्कृत सीरीस्, वाराणसी,
3. न्यायसूत्रं, प्रसन्नपदव्याख्यया सहित, पण्डितसुदर्शनाचार्यः, बौद्धभारती प्रकाशन्, वाराणसी, 1998.
4. न्यायसिद्धान्तमुक्तावली, विश्वनाथः, क्रिष्णदास् अकादमी प्रकासन्,वाराणसी,1995.
5. न्यायकुसुमाञ्जलिः,उदयनाचार्यः, राष्ट्रियसंस्कृतसंस्थानं, नवदेहली, 2009.
6. Vedanta Paribhasa, Swami Madhavananda, Advaita Ashrama, Delhi, 2015.